पुनराधानमेव च” मनुः । विद्यमानपदार्थेषु गुणान्तरस्य ३करणे “प्रजानां विनयाधानात् रक्षणाद्भरणादपि” रघुः सतो गुणान्तराधानं प्रतियत्नः” सि०कौ० । ४निवेशने “गुणोविशेषाधानहेतुः सिद्धो वस्तुधर्मः” सा०द० । ५बन्धकदाने च “आधानं विक्रयञ्चैव दानं नैव समाचरेत्” स्मृतिः “विक्रयावक्रयाधानयाचितेषु पणा दश” या०स्मृतिः अग्न्याधानञ्च विवाहसमये कर्त्तव्यं यदि तत्राहिताग्नेः प्रमदादिना नाशः तदा पितृमरणोत्तरमेव कर्त्तव्यं सति तु पितरि नैव कर्त्तव्यमिति, तत्र कालनक्षत्रादिविशेषाश्च निर्णयसिन्धौ दर्शिता यथा “प्राजापत्ये पूषभे सद्विदैवे पुष्यज्येष्ठास्वैन्द्वे कृत्तिकासु । अग्न्याधानं त्र्युत्तराणां त्रयेऽपि चित्रादित्ये कीर्त्तितं गर्गमुख्यैः” रत्नमा० आश्वलायनः “अग्न्याधेयं कृत्तिकासु रोहिण्यां मृगशिरसि फाल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोरेतेषां कस्मिंश्चिद्वसन्ते पर्वणि ब्राह्मण आदधीत, ग्रीष्मवर्षाशरत्सु क्षत्रियवैश्योपकृष्टाः” यस्मिन् कस्मिंश्चित्तावादधीत सोमेन यक्ष्यमाणो नर्त्तुं पृच्छेन्न नक्षत्रम्” सोमाधाने कृत्वाद्यनालोचनमात्तिपरम् ‘अथो खलु यदैवैनं श्रद्धोपनमेदथादधीत सैवास्यर्धिरिति सोमेन यक्ष्यमाणोनर्तुं पृच्छेन्न नक्षत्रं वदेतदार्त्तस्यातिवेलं वा श्रद्धायुक्तस्य भवतीति” बौधायनोक्तेः मदनरत्ने वृद्धगार्ग्यः “पुष्याग्नेयत्र्युत्तरादित्यपौष्णज्येष्ठाचित्रार्कद्विदैवेषु भेषु । कुर्युर्वह्न्याधानमाद्यं वसन्तग्रीष्मोष्मान्त्येष्वेव विप्रादिवर्णाः” कालादर्शे “अग्निहोत्रं दर्शपूर्णमासावप्युत्तरायणे । उपक्रम्य यथाकालमुपासीरन् द्विजातयः । सोमं च पशुबन्धञ्च सर्वाश्च विकृतीरपि । सौम्यायने यथाकालं विदध्युर्गृहमेधिनः” पारस्करः “आवसथ्याधानं दारकाले दायाद्यकाल एकेषामिति” ।दायाद्यकालोविभागकालः मदनरत्ने व्यासः “अग्निर्वैवाहिको येन न गृहीतः प्रमादिना । पितर्य्युपरते तेन गृहीतव्यः प्रयत्नतः । योऽगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते । अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः” । ज्येष्ठभ्रातरि पितरि वा साग्नौ कनिष्ठस्य पुत्रस्य वाऽग्न्यभावेऽपि न दोषः तदाह तत्रैव गार्ग्यः “पितृपाकोजीवी वा भ्रातृपाकोपजीविकः । ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना” । इदञ्चाधानं ज्येष्ठेऽकृताधाने न कार्य्यम् “दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज” इति मनुशातातपोक्तेः स्मार्त्तेऽप्येवम् “सोदर्ये तिष्ठति ज्येष्ठे न कुर्य्याद्दारसंग्रहम् । आवसथ्यं तथाधानं पतितस्तु तथ भवेदिति” तत्रैव गार्ग्योक्तेः आज्ञायां त्वदोषमाह सुमन्तुः “ज्येष्ठोभ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत् । अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा” वृद्धवसिष्ठः “अग्रजस्तु यदाऽनग्निरादध्यादनुजः कथम् । अग्रजोऽनुमते कुर्यादग्निहोत्रं यथाविधि” । हारीतः “सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत् । दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया” । अधिकारिणोऽपि भ्रातुरनुज्ञया कुर्यादिति मदनपारिजातः विवाहस्त्वनुज्ञयापि नेत्यर्थः सोदरोक्तेरसोदराणां सापत्नदत्तकादीनां न दोषः । दत्तकस्यापि सोदरविवाहाभावेऽदोष एव तदाह हेमाद्रौ वसिष्ठः “पितृव्य पुत्रान् सापत्नान् परनारीसुतांस्तथा दाराग्निहोत्र संयोगे परिविन्दन्न दुष्यति । परनारीसुताः दत्तकादयः । देशान्तरे विशेषमाह सएव “अष्टौ दश द्वादश वर्षाणि वा ज्येष्ठभ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भवतीति” क्लीबादावप्यदोषमाह कात्यायनः “देशान्तरस्थक्लीवैकवृषणान् सहोदरान् । वेश्यातिसक्तांश्च पतितशूद्रतुल्यातिरोगिणः । जडमूकान्धबधिरकुब्जवामनखञ्जकान् । अतिवृद्धानभार्यांश्च कृषिसक्तान् नृपस्य च । धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा । कुटिलोन्मत्तचौरांश्च परिविन्दन्न दुष्यति” अपरार्केऽपि “उन्मत्तः किल्विषी कुष्ठी पतितः क्लीवएव वा । राजयक्ष्मामयावी च न न्याय्यः स्यात् प्रतीक्षितुम्” एवं ज्येष्ठे च्छिन्नहस्तादावपि न परिवेतृत्वम् तदाह त्रिकाण्डमण्डनः ‘दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहम् अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थिते । न कुर्याज्जनके ज्येष्ठे सोदरेऽचाप्यकुर्वति । क्षेत्रजादावनीजाने विद्यमानेऽपि सोदरे । नाधिकारविघातोऽस्ति भिन्नोदर्य्येऽपि चौरसे । पङ्ग्वन्धमूकबधिरपतितोन्मादद्दूषणे । संन्यस्तेच्छिन्नहस्तादौ यद्वा षण्डादिदूषणे । जनके सोदरे ज्येष्ठे कुर्यादेवेतरः क्रियामिति” “आरोहतं दशतं शक्करीर्ममेत्याधान मन्त्रवर्णाच्च शक्करीरङ्गुलीः तन्त्ररत्नेऽप्युक्तम् “अङ्गवैकल्यात्पूर्वमाहिताग्नित्वेऽधिक्रियेतैव नित्येषु । आधानन्तु न कुर्यात्तस्य नैमित्तिकत्वादिति” । एवं चतुरङ्गुलेऽपि, षड़ङ्गुलकाणविवर्णादेरप्येवाधिकारः एकादशसु दशान्तर्गतेः शरीरकार्श्यं वा विप्रतिषिद्धमिति” हिरण्यकेशिसूत्रे कर्माशक्तिहेतोरेवाङ्गवैकल्यस्य निषेधात् अतएव द्राह्यायणसूत्रे याज्यश्च प्रथमैस्त्रिभिर्गुणैरिति न्यूनाङ्गस्याप्यधिकार उक्तः । अपरार्के उशनाः “पिता पितामहोयस्य अग्रजो वाथ कस्यचित् । तपोग्निहोत्रमन्त्रेषु न दोषः परिवेदने” ‘पितुराज्ञाया-